# श्रीशिवाष्टकम् २

{॥ श्रीशिवाष्टकम् २ ॥}

श्रीगणेशाय नमः ।

प्रभुमीशमनीशमशेषगुणं गुणहीनमहीश-गलाभरणम् ।

रण-निर्जित-दुर्ज्जयदैत्यपुरं प्रणमामिशिवं शिवकल्पतरुम् ॥ १॥

गिरिराज सुतान्वित-वाम तनुं तनु-निन्दित-राजित-कोटीविधुम् ।

विधि-विष्णु-शिवस्तुत-पादयुगं प्रणमामिशिवं शिवकल्पतरुम् ॥ २॥

शशिलाञ्छित-रञ्जित-सन्मुकुटं कटिलम्बित-सुन्दर-कृत्तिपटम् ।

सुरशैवलिनी-कृत-पूतजटं प्रणमामिशिवं शिवकल्पतरुम् ॥ ३॥

नयनत्रय-भूषित-चारुमुखं मुखपद्म-पराजित-कोटिविधुम् ।

विधु-खण्ड-विमण्डित-भालतटं प्रणमामिशिवं शिवकल्पतरुम् ॥ ४॥

वृषराज-निकेतनमादिगुरुं गरलाशनमाजि विषाणधरम् ।

प्रमथाधिप-सेवक-रञ्जनकं प्रणमामिशिवं शिवकल्पतरुम् ॥ ५॥

मकरध्वज-मत्तमतङ्गहरं करिचर्म्मगनाग-विबोधकरम् ।

वरदाभय-शूलविषाण-धरं प्रणमामिशिवं शिवकल्पतरुम् ॥ ६॥

जगदुद्भव-पालन-नाशकरं कृपयैव पुनस्त्रय रूपधरम् ।

प्रिय मानव-साधुजनैकगतिं प्रणमामिशिवं शिवकल्पतरुम् ॥ ७॥

न दत्तन्तु पुष्पं सदा पाप चित्तैः पुनर्जन्म दुःखात् परित्राहि शम्भो ।

भजतोऽखिल दुःख समूह हरं प्रणमामिशिवं शिवकल्पतरुम् ॥ ८॥

॥ इति शिवाष्टकं सम्पूर्णम् ॥

Encoded and proofread by Ravin Bhalekar ravibhalekar@hotmail.com

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Shivashtakam ( Version 3 ) Lyrics in Devanagari PDF
% File name : shivaaShTakam.itx
% Category : aShTaka
% Location : doc_shiva
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Ravin Bhalekar ravibhalekar at hotmail.com
% Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com
% Latest update : September 25, 2004
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 12, 2015 ] at Stotram Website